# विशेषफलितांशाः (PSO)

## शास्त्री – बौद्धदर्शनम्

एतस्य पाठ्यक्रमस्य परिणामा: -

- बौद्धदर्शनं प्रति अभिनवविषयावबोधस्य धारणायाः विकासः ।
- पालिभाषायाः परिचयेन, 'धम्मपद' इत्यस्य पालिग्रन्थस्य ज्ञानेन तन्निहितत्रिपिटकसाहित्यस्य वैशिष्ट्यं प्रति अवबोधः । नैतिक धारणायाः विकास: ।
- चित्तशोधनविधीनां प्रति जिज्ञासायाः विकास:, अनेन राग-द्वेष-मोहादिविषयेषु ज्ञानम्, अनेन दैनिकव्यवहारेऽपि परिवर्तनम् । विषयज्ञानं प्रति जिज्ञासावृद्धि: ।
- बौद्धयोगं प्रति जिज्ञासायाः वृद्धिः ।
- चित्ते संस्थितानाम् आग्रहाणं प्रति समीक्षादृष्टे: विकासः, साधनायाः विविधप्रकल्पेषु जिज्ञासावृद्धि, बौद्धन्यायेन परिचयतया पूर्वस्थापितदृष्टीनां पुनरावलोकनं खण्डनञ्च ।
- महायानस्य परिचयतया बौद्धसंस्कृतवाङ्मये जिज्ञासायाः वृद्धिः। साधनाया : अवबोध:।

# आचार्य - बौद्धदर्शनम्

- आत्मा-ईश्वर-शब्दार्थ-ब्रह्म-प्रकृति-पुरुषप्रभृतिविषयाणां प्रति बौद्धदिशा परिज्ञानेन, तेषां खण्डनेन, स्वकीयव्यवहारे परिवर्तनम्।
- योगाचारस्य (विज्ञानवादस्य) क्षेत्रे चित्तमात्रताया परिज्ञानेन, अभिनवदृष्टे: विकासः, साधनायाः क्षेत्रे जिज्ञासा वृद्धि:।
- बोधिसत्त्वयाने प्रयुक्तानां दशभूमीनां विषये ज्ञानम्, विविधयोगविधीनां च प्रासंगिकीचर्चया अध्यात्मजिज्ञासायां वृद्धिः।
- अभिधर्मकोशाध्ययनेन बौद्धवाङ्मये प्रयुक्तानां पदपदार्थानाम् अधिगम:, अथ च वैभाषिकनये विविधदृष्टीना परिज्ञानम्।
- योगाचार-स्वातंत्रिक-माध्यमिकदर्शनसम्प्रदायस्य अध्ययनेन नेपाल-भूटान-तिब्बत- मंगोलिया-चीन-जापान-कोरियाप्रभृतीषु राष्ट्रेषु विकसितस्य बुद्धयानस्य परिचय:, एतत्सम्बन्धिन्यां जिज्ञासायां वृद्धिः, बौद्धनये शब्दार्थमधिकृत्य वैदिकावैदिकपरम्परासु प्रचलितानां सिद्धान्तानां खण्डनेन चित्ते विकल्पजालस्य परिष्कारे प्रवृत्तिः।
- प्रासङ्गिकमाध्यमिकदर्शनस्य परिचयतया प्रत्यय-आत्म-गति-तथागत-दृष्टि-आर्यसत्यादिविषयाणां प्रति शून्यताबोध: कथं जायते ? इत्यस्य ज्ञानेन व्यवहार- परमार्थयो: मध्ये पार्थक्यज्ञानम्। अनेन आग्रहमुक्तो भूत्वा चरेत् इत्यस्य बोध: जायते।
- सत्यद्वयमधिकृत्य विकसितस्य प्रमाणशास्त्रस्य परिज्ञानादपि बौद्धानां परयूथ्यैः सह विकसिताया: शास्त्रार्थपरम्पराया: ज्ञानं जायते। अनेन प्रमाण व्यवस्था एव सम्यक् न तु प्रमाणसम्प्लव: इत्यावबोधस्य विकासः जायते। अनेन छात्रेषु व्यवहारपरिवर्तनमपि भवति।

# विद्यावारिधिः - बौद्धदर्शनम्

- बौद्धविद्याया: स्वरूपं तस्य साहित्यञ्च अनुदिनं विभिन्नेषु देशेषु वृद्धित्वमधिगच्छति । तम् अधिकृत्य अथ च बौद्ध-बौद्धेतरदर्शनसम्प्रदायेषु, एवमेव शैव-शाक्त-पाञ्चरात्र-सहजिया-बाउलप्रभृतीषु साधनासु मध्ये अपि तुलनात्मकविमर्शमधिकृत्य अनुसन्धानतया राष्ट्रस्य बहुविधसांस्कृतिकवैभवस्य अधिगमावाप्तिः ।

- वज्रयाने नैकेषां देव-देवी-यक्ष-किन्नर-गन्धर्व-नागादीनाम् अर्धदेवानामपि विकासो जात: । तत्र वैदिकदेवानामपि उपस्थितिः सादरेणोपलभ्यते । तमधिकृत्यानुसन्धानेन बौद्धर्शनस्य व्यापकत्वावबोध: जायते ।

- सम्प्रति चीनी-भोटादि-आगमेषु नैके ग्रन्थाः उपलभ्यन्ते, येषां मूलसंस्कृतभाषायाम् अनुपलब्धिः अस्माकं देशे, तेषां तत्तत्भाषातः मूलसंस्कृते पुनरुद्धारस्य दिशि अपि संलग्नोऽयं विभाग:। अनेक ज्ञानस्य नवोन्मेषानां संभावना जायते ।

- संसारस्य नैकेषु बौद्धविद्याविभागेषु विश्वविद्यालयेषु प्रवृत्तबौद्धसम्प्रदायस्य (Engaged Buddhism) चर्चा अनेकधा दरीदृश्यते । अत्र सम्प्रदायस्य अस्य शास्त्रीयमाधारं किम् ? इति विषयमधिकृत्य यत्नशीला: अध्येतारः । अनेने नवोन्मेषाय दृष्टिः उद्भविता इति संकल्पना ।